Topics 5

# अव्ययीभाव - 3

विभाषा अधिकारोऽयम् । एतत्सामर्थ्यादेव प्राचीनानां नित्यसमासत्वम् । सुप्सुपा इति तु न नित्यसमासः । अव्ययम् इत्यादिसमासविधानाज्ज्ञापकात्

अपपरिबहिरञ्चवः पञ्चम्या ।

अपविष्णु संसारः, अप विष्णोः । परिविष्णु, परिविष्णोः । बहिर्वनम् , बहिर्वनात् । प्राग्वनम् , प्राग्वनात् ।

आङ् मर्यादाऽभिविध्योः ।

एतयोराङ् पञ्चम्यन्तेन वा समस्यते, सोऽव्ययीभावः । आमुक्ति संसारः, आ मुक्तेः आबालं हरिभक्तिः, आ बालेभ्यः

लक्षणेनाभिप्रती आभिमुख्ये ।
आभिमुख्यद्योतकाभिप्रती चिह्न-वाचिना । सह प्राग्वत् । अभ्य ग्नि शलभाः पतन्ति, अग्निमभि । प्रत्यग्नि, अग्निं प्रति ।

अनुर्यत्समया ।
यं पदार्थं समया द्योत्यते तेन लक्षण भूतेनानुः समस्यते, सोऽव्ययीभावः ।
अनुवनमशनिर्गतः । वनस्य समीपं गत इत्यर्थः

यस्य चायामः ।
यस्य दैर्घ्यमनुना द्योत्यते तेन लक्षण भूतेनानुः समस्यते । अनुगङ्गं वाराणसी । गङ्गाया अनु ।
गंगादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः

तिष्ठद्गुप्रभृतीनि च।

एतानि पाठ्यन्ते। तिष्ठन्ति गावो यस्मिन् काले स तिष्ठद्गु दोहनकालः। आयतीगवम्। इह शत्रादेशः पुंवद्भाव विरहः समासान्तश्च निपात्यते इत्यादि।

उदाहरणद्वय इत्यर्थः।

शत्रादेश इति। तिष्ठन्त्यो गाव इति आयत्यो गाव इति च प्रथमासमानाधिकरणत्वात् लटः शतृशानचौ — इत्यप्राप्तौ तन्निपातनमिति भावः। पुंवद्भावेति। तिष्ठन्तीशब्दस्यैव आयतीशब्दस्यापि। स्त्रियाः पुंवत् इति पुंवत्त्वस्य प्राप्तौ तदभावो निपात्यत इति भावः।

पारे मध्ये षष्ठ्या वा। पार मध्यशब्दौ षष्ठ्यन्तेन सह वा समस्येते। एदन्तत्वं चानयोर्निपात्यते। पक्षे षष्ठी तत्पुरुषः। पारेगङ्गादानय, गङ्गापारात्। मध्येगङ्गात्, गङ्गामध्यात्। महाविभाषया वाक्यमपि। गङ्गायाः पारात्। गङ्गाया मध्यात्।

संख्या वंश्येन। वंशो द्विधा, विद्यया
जन्मना च, तत्र भवो वंश्यः।
तद्वाचिनां सह ११ संख्या वा समस्यते ॥
द्वौ मुनी वंश्यौ द्विमुनि व्याकरणस्य।
त्रिमुनि। विद्यातद्वतामभेदविवक्षायां
त्रिमुनि व्याकरणम्। एकविंशति
भारद्वाजम्।